क्र०सं०ग्रा०ॐ०
प्रवेश सं० ५२०७२ विषय: वेद क्रम सं०

नाम दर्शपूर्णमासमंत्रार्थसंग्रहचन्द्रिका बौधायनीया ग्रन्थकार पाजगुण्डापनामक वैद्यनाथ भट्टः

पत्र सं० १–५२ अक्षर सं० (पंक्ति) ३२ पंक्ति सं० (पृष्ठ) ११

श्लोक सं०

आकार १०.३×४.२ लिपि दे.ना. प्राचीन ३१

वि० विवरण 001233 ना.१५-८-८४

पी० एस० यू० पी०—८० एस० सी० ई०—१६५९—१० ००० 

Indira Gandhi National Centre for the Arts

ग्रं.सं. ४००७२

॥ जयरत्नपूर्णभाराम संग्रार्थसंग्रहदंडिकाप्रारंभः॥

॥ नानादिदेशन मागनतु श्री॥

Indira Gandhi National
Centre for the Arts

श्रीगणेशाय नमः ॥ ॥आश्रये जगदाधारं हेरंबांघ्रिसरोरुहे ॥ यद्ध्यानःस्पर्शनाद्विघ्नवा
र्द्धिः शुष्यत्यसंशयं ॥१॥ अस्ति श्रीमदमंदमंदरगिरिग्रावस्थलप्रस्खलत्तुंगतुंगतरंगभं
१ गिसुभगगन्नभासमजारोधसि ॥ इंद्रप्रस्थपुरं जगज्जनयुतं सत्संपदामास्पदं स्वःसाम्राज्यवि
डंबिनिस्तुलगुणं भूमंडलीमंडनं ॥२॥ तत्रोदारपवित्रचित्रचरिते सद्विश्वविश्वंभरालंबे श्रीव
रणारविंदयुगलध्यानादवाप्तोदये ॥ आत्रेयाख्यकुलांबुधौ समभवद्रत्नं महादेवकं शंभुःसो
ऽपरो विना मतिनिधिर्भालीयमालोचनं ॥३॥ वापूजीति महामणिः प्रभुवरो वंशावतंसस्ततःस्वे
भामि घइ वावदातहृदयो विष्णोः पदालंबनः ॥ साक्षान्माधव एव संप्रति पुनस्त्रातुं जगन्मंडलं जा
तो यत्र शशाम शास्त्रसुविदां दारिद्र्यदावानलः ॥४॥ क्षमोद्वहनधीरताऽधरीकृतभुजगराजः ॥
पद्मभूः पुरुषार्थान्वहति यशोदयावर्द्धितः ॥५॥ यो वेदांतविचारचारुसुमतिः संध्यादि १
सत्सौतिमानन्नादिद्रविणादिदाननिरतो दिल्यां महाभाग्यवान् ॥ ज्ञाता पंडितवैदिकादिनिक
रज्ञानेकनिष्ठस्सुधीः श्रीमान्दीनपरायणः सुजनतापूर्णः सदा सात्विकः ॥६॥ कर्मब्रह्मोक्त

हृदयः कुर्वन्निंद्रसदःश्रियम् ॥ उमारमणपादाब्जप्राप्तभूमींद्रवैभवः ॥७॥ बालाजीनाजि
रायाणां प्रेमपात्रतमं सदा ॥ विद्वान्हि सर्वनीतिज्ञो भूपतिर्मित्रदृक्प्रभुः ॥८॥ वैद्यनाथः पाथगुंडे
यथामति तु तन्मुदे ॥ आलोच्यानेकभाष्यार्थानेकीकृत्य च यत्नतः ॥९॥ बौधायनऋषेः सर्वर्
षिप्रवरमौलिनः ॥ कल्पयामि क्रमाद्दर्शपूर्णमासानुगान्मनून् ॥१०॥ आहिताग्निरन्वाधानदि
नेप्रातरग्निहोत्रं हुत्वाऽश्मश्रूपपक्षकेशलोमनखानि वापयित्वा कृतस्नानो नवनीताभ्यंजनोज
नोऽहतवासाः स्नातैः पत्न्यध्वर्य्वादिभिः सह प्रत्येकं सप्तभिः सप्तभिर्दर्भपिंजूलैर्मुखं नाभिं गु
ल्फौ च संमृज्य दर्भान्समुच्छित्य प्रोक्ष्योदङ् निरस्यति अप उपस्पृश्य ततः सवनं· अथ मंत्राचमनं कु
र्यात् आपो हि ष्ठेति तिसृभिस्त्रिरपः पिबेद्धाहृतीभिर्मुखमुन्मृजेदेतद्वा विपरीतं तन्मंत्राचमनं ॥
ततः शेषं समाप्य मंत्रप्रोक्षणं करोतीति॰ अग्रे श्मश्रूण्यवपेत अथोपपक्षौ अथ केशानिति श्रु
त्तोकर्मीते चाभिधानाद्यथाक्रमं वापयेत् ॥ ऊर्ध्वोष्ठस्थ हनुकपोलस्थ। भालस्थ। केशाः क्रमेण
र्थः। अंजनांतेन हंद्वेन कृतशद्वेन वद्रुत्रीहिः क्रमाचरणक इत्यर्थः। एकविंशत्यादर्भपिंजूलैः प

Indira Gandhi National Centre for the Arts

वयतीतिश्रुत्यादकुभिर्दर्भेनाडीभिर्युक्तमेकं कौंउदर्भपिंजूलमितिविद्यारण्यस्वामिभिर्व्याख्या॰
२ तत्वेन कुशत्रयसमुदायस्तत् इत्यन्ये व्याख्यातत्वेन च उभयथापि एक विंशति कुशात्रसमुदायस्य
पवनकरणत्वप्रतीतिस्तथापि त्रिधाविभज्यसप्तभिः॰ गुल्फांतं संमृजेत्॰ ततः समुच्छ्रितं सेकीकृत्य॰ मुखादि
संमार्जनमंत्रा चमनमंत्रप्रोक्षणानि अध्वर्युपत्नी यजमानादीनां बोध्यानि॰ एतद्वाविपरीतं व्यस्ताभिर्व्या
हृतिभिस्त्रिरपः पिबेत्॰ आपोहिष्ठेतितिसृभिर्मुखमुन्मृजेदिति वा विपरीतं॰ ततो मुखाच्छिद्रं हस्तौ शि
रश्चक्षुषी नासिके श्रोत्रे हृदयं चोन्मृजेदित्यर्थः। अथ मंत्रव्याख्याने आपोहीति॰ आपोहिष्ठा मयोभु
वस्तान ऊर्ज्जे दधातन॥ महेरणाय चक्षसइति। हि शब्दः एवकारार्थः॥ प्रसिद्ध्यर्थो वा॥ हे आपो यूयमे
व मयोभुवः स्थ सुखस्य भावयित्र्यो भवत। स्नानपानादिहेतुत्वेन सुखोत्पादकत्वं प्रसिद्धं। तास्तादृश्यो
यूयं नोऽस्मानूर्जे रसाय भवदीयरसानुभवार्थं दधातन स्थापयत॥ किंच महे महते रणाय रमणीया २
य चक्षसे दर्शनाय दधातन॥ अस्मान् परतत्वसाक्षात्कारयोग्यान् कुरुतेत्यर्थः॥ अथ द्वितीयामा
ह॥ यो वः शिवतमो॰ मातरइति। वो युष्माकं शिवतमः शांततमः सुखैकपातुर्यो रसोऽस्ति। इहास्मि

न्कर्मणि नोऽस्मान् तस्य भाजयत॥ तं रसं प्रापयत तत्र दृष्टांतः। उशतीरिव मातरः कामयमानाः प्री
तियुक्ता मातरो यथा स्वकीयं स्तन्यरसं प्रापयंति तद्वदित्यर्थः। तृतीयामाह॥ तस्मा अरं गमाम॰ थाचनद्
नि। यस्य रसस्य क्षयाय क्षयेण निवासेन जिन्वथ यूयं प्रीता भवथ। तस्मै रसाय वो युष्मान् अलं भृशं प्रा
प्नुमः। किंचहे आपो यूयं नोऽस्मान् जनयथ : प्रजोत्पादकान् कुरुध। व्याहृतयः नूर्दक्षिणतः। भूरिति वा
अयं लोक इति श्रुतिः भूरिति पृथिव्यात्मको गार्हपत्योऽग्निरिति भावयन् दक्षिणतः दक्षिणमंसं संमृजे
त्। भुवइत्युत्तरतः। भुवइत्यंतरिक्षमिति श्रुतिः अंतरिक्षात्मको आहवनीय इति भावयन् उत्तरस्तः उ
त्तरमंसं संमृजेत्। सुवइति अलोमकौ ओष्ठौ। सुवइत्यसौ लोक इति श्रुतिः। स्वर्गात्मको दक्षिणाग्नि
रिति भावयन् अलोमकौ ओष्ठौ संमृज्यात्। दधिक्राव्णो॰ दधिक्रामति प्राप्नोति दधिक्रावा। एतन्नाम
को दधिप्रियः कश्चिद्देवविशेषः। अग्निरित्यन्ये। तस्य देवस्याकारिषं अहं करोमि स्तवनान्निमित्ता की

दृशस्य जिष्णोर्जयशीलस्य अश्वस्य व्यापिनः । वाजिनोऽन्नवतः । स देवो नोऽस्माकं मुखं सुरभि कर
त् । कर्पूरादिद्रव्यसमृद्धिप्रदानेन सुगंधोपेतं करोतु । अस्माकमायूंषि च प्रतारिषत् प्रवर्द्धतु । आ पादि
३ ति व्याख्यातं । यच्चिद्धि ते० वरुण प्रियामह इति । हे वरुण देव ते त्वदीयं यच्चिद्धि यत्किंचिदपि कर्म व्र
तं दिवि दिवि दिने दिने प्रकर्षेण मिनीमसि तर्कयामः तत्र दृष्टांतः विशो यथा सर्वाः प्रजाः स्वस्वव्यापारं य
था तर्कयेति तद्वत् । हि यस्मात्त्वदीयं व्रतं कर्म सर्वदा तर्कयामस्तस्मात्त्वोपरि न रेमेति शेषः । द्वितीयामा
यत्किंचेदं ह । हे वरुण मनुष्या वयं दैव्ये देवलोकवर्त्तिनि जने यत्किंचेदमभिद्रोहं स्वल्पमधिकं वा द्रोहं अचित्ती
अज्ञानेन चरामसि कुर्मः । किंच यदपि तव धर्मा त्वदीयं कर्म युयोपिम विनाशयामः । हे देव तस्मादेनसो द्रो
हाकर्मनाशाच्च नोऽस्मान्मा रीरिषः हिंसां मा कृथाः तृतीयामाह ॥ कितवासः धूर्त्तसमानाः स्वार्थसा ३
धनपराः कृतिजा यत्कर्मागे रिरिपुर्नाशितवंतः न दीवि न तु देवने सम्यग्व्यवहृतौ प्रवर्त्तन्ते । वा अथ

वा यत् घ पापं सत्यं अवश्यं कृतं ज्ञात्वैव कृतमित्यर्थः । घ इति छेदः । अघ इति वा छेद इत्यपरे । आद्ये नामै
कदेश इति न्यायेन । अघशब्दात्सोः सुपां सुलुगिति लुकि घ इति एवं च घ इति पादपूरणार्थकः । अस्वं
उः पापवाचको निपातो वेति अभियुक्तोक्तं व्याख्यानं चिंत्यं । उत अपि च यदन्न विद्म । यत्पापमज्ञानेन कृ
तमित्यर्थः । सर्वा ता कृत्विन्भिर्विनाशितमं गं ज्ञात्वा कृतमज्ञानेन कृतं चेति यानि संति तानि सर्वाणि शि
थिरेव शिथिलानीव विष्य परिहर दूरीकुर्वित्यर्थः । अथानंतरं हे वरुण ते तव प्रियासः स्याम प्रिया भवे
म ॥ हिरण्यवर्णाः शुचयः० नाभवंतिति ॥ आपस्ता च निर्मलत्वेन भास्वरत्वाद्धिरण्यसदृशवर्णोपेताः
तथा शुचयः । स्वयं शुद्धाः पावकाः स्नानादिना शरीरादिशुद्धिहेतवश्च । यासु प्रसूतकश्यपाख्यः प्रजाप
तिरुत्पन्नः । यासु प्रसूत इंद्रोप्युत्पन्नः अग्निं च या आपो गर्भत्वेन दधिरे तदेतत्त्रयं शाखांतरगतेभ्यो
र्थवादेभ्यो द्रष्टव्यं । अत्राप्यग्ने गर्भो अपामसीति चतुर्थकांडे मंत्रांतरमाम्नातं । ईदृश्यो या आपस्ताः

Indira Gandhi National
Centre for the Arts

स्योनाः सुखकारिण्यः अतो ऽस्माकं शं भवंतु सुखं प्रापयंतु॥ यासां राजा॰ भवंत्विति॥ वरुणाख्यो
राजा अपामधिपतिर्यासामपां मध्ये याति गूढः संचरति। किं कुर्वन्। जनानां सत्यानृते अवपश्यन्।
४ स्नानपानादौ यो यथाशास्त्रमाचरति तत्सर्वमवपश्यन्। ताश्चापो मधुरसं श्चोतंति क्षारयंती तिम
धुश्चुतः शुचयः इत्यादि पूर्ववत्॥ यासां देवादि॰ भवंत्विति॰ दिवि द्युलोके देवा यासामपां संबधिसा
रंभक्षं कुर्वंति स्वभोज्यं कुर्वंति। या पूर्वं हि देवैः सेव्यंते। तच्चापां सारभूतं याश्चापो अंतरिक्षे [illegible] धाव
रूपेण बहुप्रकारा भवंति। याश्चापः पृथिवीं सर्वां पयसा सक्रीदेन द्रवेणोंदंति क्लेदयंति शुक्रा निर्मलाः
तान आप इत्यादि पूर्ववत्। शिवेन मा चक्षुषा॰ निधत्तेति। हे आपो यूयं शिवेन चक्षुषा शंतया दृष्ट्या मा
पश्यत। मामवलोकयत। तथा शिवया तन्वा शंतेन त्वदीयशरीरेण मे त्वचमुपस्पृशत। अहमप्य
प्सुषदो जलेषु स्थितान् सर्वानप्यग्नीन् हुवे जुहोमि। होमेन तर्पयामि वो युष्मदीयं यत् वर्चः कांतिः

यच्चाबलं यद्व्योजो बलहेतुरष्टमो धातुः तत्सर्वं मयि निधत्त स्थापयत। पवमानः पुनातु मा इति।
यो देवः पोता सर्वेषां शोधयिता स देवः पवित्रेण शुद्धिसाधनेनास्मदीयतपध्यानादिना मां पुनातु शो
धयतु। कीदृशः पोता। पवमानः शोधनकुशलः। सुवर्जनः स्वर्गलोकोत्पन्नः। विचर्षणिः विविधयो
धनप्रकाराभिज्ञः॥ अथ द्वितीयामाह। पुनंतु मा देव॰ आयव इति॰ ये कल्पादौ स्वर्गलोके पुण्यमुत्पन्न
त्वेन देवरूपा जनाः॥ ये च स्वायंभुवमनुप्रभृतयो ऋषयः। ते पि स्वकर्मवशान्मनुष्यलोके आयांति
सायवो मनुष्याः सदाचारपराः सुकृतवंतः। ते विश्वे सर्वे पि धिया अनुग्रहबुद्ध्या मां पुनंतु॥
अथ तृतीयामाह॥ जातवेदः॰ क्रतवे रनु इति। हे जातवेद उत्पन्नसर्वजगद्विज्ञानाग्ने देव॰ शुक्रेण
दीप्यत्॰ दीप्याभासमानः त्वं क्रतवे रनु॰ अस्मदनुष्ठेयान् कर्मविशेषाननुलक्ष्य पवित्रेणाकृत्वा
शोधकेन त्वसंकल्पेन पवित्रवदस्मदनुष्ठितं कर्म शुद्धियुक्तं यथा भवति तथा मां पुनीहि शोध

Indira Gandhi National
Centre for the Arts

य। चतुर्थीमाह ॥ यत्ते पवित्र० तेन पुनीमहे इति। हे अग्ने तव अर्चिषि जिह्वाज्वालानां अंतरा मध्ये विततं विस्तृतं
५ यत्पवित्रं शुद्धिसाधनं ब्रह्मपरिवृढमस्ति तेन वयं पुनीमहे। अथ पंचमीमाह। उभाभ्यां देव० पुनीमहे इ
ति। हे सवितर्देव त्वदीयं यत्पवित्रं शुद्धिसाधनं। यच्च सवः कर्मस्वस्मद्विषयं प्रेरणं। ताभ्यामुभाभ्यामिदं ब्र
ह्मपरिवृढं कर्म पुनीमहे शोधयामः। अथ षष्ठीमाह। वैश्वदेवी पु० रयीणामिति। वैश्वदेवी सर्वदेवस
ंबंधिनी या देवी शोधनकुशला सा अस्मान् पुनती शोधयंती आगात् आगच्छतु। यस्यै यस्याः देव्याः तन्वः शुद्धि
हेतवो देहविशेषाः वीतपृष्ठाः कांतस्तुतयः तया देव्या अनुगृहीताः सधमाद्येषु ऋत्विग्भिः सह हर्षयोग्ये
षु कर्मसु मदंतो हृष्यंतो वयं रयीणां धनानां पतयः स्याम। अथ सप्तमीमाह। वैश्वानरो रश्मिभिर्मा पुना०
दमापुनीतामिति। विश्वेषां नराणां हितोऽग्निरादित्यो वा देवः स्वकीयरश्मिभिर्मां पुनातु। वातो वायुर्दे ५
वः प्राणेनेषिरः प्राणरूपेण देहे पुगच्छन् मयोभूः सुखभावयिता भवतु। द्यावापृथिव्यौ च ऋताव

री ऋतावर्यौ सत्यवत्यौ यज्ञिये यज्ञार्हे ते सत्यौ पयसा जलेन पयोभिः क्षीरादिरसैश्च मां पुनीतां। अथा
ष्टमीमाह। बृहद्भिः सवितस्तृ० पुनाहि मेति। हे सवितः। कर्मसुप्रेरकाग्ने देव मन्मभिर्मननैरस्मदनुग्रह
विषयं मां पुनीहि। कीदृशैः बृहद्भिः महद्भिरादरयुक्तैः। तृभिः पापतरणसाधनैः। वर्षिष्ठैः चिरकालानुव
र्त्याद्दृढतमैर्दक्षैः शोधनकुशलैः। अथ नवमीमाह। येन देवा अपुनत० ब्रह्म पुनीमहे इति। येन शुद्धिसाध
नेन देवाः पूर्वान्यजमानान् पुनत। कश गतौ इति धातोरूपमन्तः शकारांतः कश शब्दो गतिवाची येन शुद्धि
साधनेनापो देवताः दिव्यं कशोऽपुनत। द्युलोकविषयां गतिं शोधितवंतः दिव्येन द्युलोकप्राप्येन ब्रह्मणा
परिवृढेन तेन शुद्धिसाधनेनेदं ब्रह्मानुष्ठीयमानं परिवृढं कर्म पुनीमहे। अथ दशमीमाह। यः पाव० सोम
र्वं स्मप० स्वनेति। यः पुमान् पावमानीः शोधकदेवतासंबंधिनीरेताः ऋचः अध्येति पठति। अयं नरः सार
तिवा। सपुरुषः सर्वं संसारभूतं फलमश्नाति भुंक्ते कीदृशं रसं ऋषिभिः संभृतं मंत्रैर्मदभिज्ञैर्मुनिभि

Indira Gandhi National
Centre for the Arts

श्च संपादितं अतएव पूतं शुद्धं मातरिश्वना वायुना स्वदितं स्वादूकृतं॰ अथैकादशीमाह। पावमानीर्यो अ॰
ऽदकमिति॰ यो ध्येति॰ तस्मै पुरुषाय सरस्वती रसं दुग्धे॰ कीदृशं क्षीरादिरूपं॥ अथ द्वादशीमाह॰ पाव
६ मानीस्व॰ पयस्वतीः। ऋ॰ हितमिति॰ याः पावमान्यः ऋचस्ताः स्वस्ता। स्वस्त्ययनीः क्षेमप्रापिकाः सुदु
घाः सुष्टु फलं दुहानाः पयस्वतीः क्षीरादिरसहेतवश्च प्रसिद्धाः अस्माननुगृह्णन्तिति शेषः ऋषिभिर्मे
ऽदर्शिभिर्मुनिभिः रसः फलसारः संभृतः अस्मासु संपादितः ब्राह्मणेभ्यः तस्मात्कौः ब्राह्मणाः तेषु स्मा
मृतममृतं अविनाशि हितं संपादितं॰ अथ त्रयोदशीमाह। पावमानीर्दि॰ समाभृता इति॰ देवैरिंद्रादि
भिः समाहृताः संपादिताः पावमानीर्दीः पवमानमंत्राभिमानिन्यो देवता कदृशं दिशंतु प्रयच्छं
तु॰ तत्रसान्कामांश्च नाः स्मदर्थं समृद्धान् कुर्वंतु। अथ चतुर्दशीमाह। पावमानीस्व॰ ऽघृत॰ इति मि ६
ति॰ घृतं श्चोतंति क्षारयंतीति घृतश्चुतः अन्यत्स्पष्टं। अथ पंचदशीमाह। येन देवाः प॰ पुनंतु मेति। देवाः

इंद्राद्याः येन पवित्रेण शुद्धिसाधनेन सदा स्वदेहं शोधयंति॰ सहस्रधारं तरभेदयुक्तेन तेन साधनेन पावमा
न्यश्चऋचो मां पुनंतु। अथ षोडशीमाह। प्राजापत्यं प॰ पुनीमहे इति॰ यत्पवित्रं शुद्धिसाधनं प्राजापत्यं प्रजा
पतिसंबंधि गतो घ्नामं इदं मे विनिर्मितत्वात् शतसंख्याकेरुघ्नामेनो विशेषेसुक्तं हिरण्मयं साधनेन ब्र
ह्मणा निर्मितं तेन तादृशेन पवित्रेण ब्रह्मविदो देवाः यं विदो वयं पूतं ब्रह्म पूर्वं मा कर्म पुनीमहे
भूयोपि शोधयामः। अथ सप्तदशीमाह। इंद्रः सुनीती इंद्रः सुनीत्या शोभनफलप्रापिकया दिव्या सह मां
पुनातु वरुणः समीच्या अनुकूलया देव्या सह मां पुनातु। यं मा राजा प्रमत्ताभिः प्रकर्षेण मादिकाभिर्दे
वीभिः सह मां पुनातु॰ जातवेदा ऊर्जयंत्या क्षीरादिरसप्रापिकया देव्या सह मां पुनातु॰ कयानश्चित्र॰
स्तुतिभिः। कस्य प्रजापतेः संबंधिनी सप्तम्यर्थे केति शब्दः स्त्रीलिंगे वर्तते॰ ऊती शब्दो रक्षावाचकस्त
या ऊत्या प्रजापतिसंबंधिना रक्षणेन चित्र आभुवत् चित्रो दंयश्रानो स्मान् प्रत्यागतः कीदृशो यज्ञः

सोमः स्या सह मां पुनातु॰

Indira Gandhi National
Centre for the Arts

सदावृधः सर्वदा वर्धमानः सखानामिव प्रियतमः सखायइः कया प्रज्ञा प्रतिसंबंधिन्या शचिष्ठया अति
शयेन तया शक्त्या वृता वर्तते। हे इंद्र त्वं कः प्रजापतिः मत्सत् मदयतु हर्षयतु। कीदृशः प्रजापतिः सत्यः
७ परमार्थभूतः मदानां हर्षकारणानां आसुतादीनां अंधसो ऽन्नस्य चमद्रिष्ठः अतिशयेन वर्द्धयिता। आ
रुजे सर्वनो निघ्नं गार्थं वसु अपेक्षितं धनं। दृढाचित् दृढमेव करोत्विति शेषः। इंद्रजापतेजरितॄणां जारण
शीलानां सखीनां स्तोतॄणां अस्माकं शतं ऊतिभिः तत्संख्याकै रक्षणैः। अभीषुणः सर्वतः सु
ष्टु अविता भवासि॥ तरत्स इति चतुर्ऋचं तत्र प्रथमा। तरत्स मंदी ... मंदी देवानां हर्षकरः स सोमः तरत् स्तो
तृन् पाप्मनः सकाशात्तारयन् धावति पवते। तदेव दर्शयति। सुतस्याभिषुतस्यांधसो दयानामन्नात्मकस्य ७
सोमस्य धारा धावति पवते। पुनरपि तदेवाह। संतादरार्थं। तरत्स मंदी धावतीति। यद्वास्माकं दोषात् स्तेनात् लो
... इत्यर्थः तद्यथा। तरतिस ... सर्वं मंदी सन् ... धावति गच्छत् इंगितं। धारासुतस्यांधसो धारयामि

सुतस्य सोमस्य मंत्रपूतस्य वाचा कृतस्येति। अथ द्वितीया॥ उस्रा वेदेति। वसूनां धनानां मुस्रो सर ...
प्रदात्री देवी यो तमानास्त्र्यमाना वा सोमस्य धारा मर्त्यस्य मनुष्यस्य जमानं वसो राक्षस्तुं वेद जानाति। सिद्धम
न्यत्। अथ तृतीया। ध्वस्रयोरिति। ध्वस्रयोः पुरुषंत्योः ध्वस्रः क
श्चिद्राजा। तयोरुभयोरत्रेतरेतरयोगविवक्षया द्विवचनं द्रष्टव्यं। सहस्राणि धनानां सहस्राण्याददमहे। व
यं प्रतिगृहीतवः। तदस्माभिः प्रतिगृहीतं धनमुत्तममस्तीति कथं नः सो मं प्रार्थयत इति सोमस्य स्तुतिः। सि
द्धमन्यत्। यथा वस्तारएतयोर्धनानि प्रतिजग्राह एवं तरन्त पुरुमीढौ प्रतिजगृहतुः। तथा च शाट्यायनकं। अ
थ ह वैतरंत पुरुमीढौ तदश्वीध्वस्रयोः पुरुषंत्यो र्बहु प्रतिगृह्य गरगिराविव मेनाते तोहसां गुल्मासते प्र
तिम शाते नावकामयेतां सातं नाविवेद। सा तस्मा दात्रमिवैव न प्रतिगृहीतमिति तावेतच्चतुर्ऋचमपश्यतां
तेन प्रस्तुतं ततो वै तयोरसात ममवदात्रमिवैव न प्रतिगृहीत सद्यः प्रतिगृह्य कामयेते त्यादि। अथ चतुर्थी।

Indira Gandhi National
Centre for the Arts

आयमेति। यमोर्थस्तत्पुरुषं सोस्त्रिंशतं त्रिंशतानि सहस्राणि तनोदस्मात्पादश्लोहेदं प्रतिगृह्णीमः। त
८ यारस्माभिः प्रतिगृहीतं तत्सर्वमप्रतिगृहीतमस्त्विति सोमं रूपिः प्रार्थयत इति सोमस्येव स्तुतिः। सिद्धमन्य
तु। याः पुरस्तात्पू० मारुतेरिति: रश्मयरश्मय एव पवित्रं शुद्धिकारणं यासां तास्तादृशीभिः। अतएवोक्त
[illegible] दिवागातुविद इत्यन्या [illegible]
वनमंत्रे समाम्नायते। देवोनः सवितोत्पुनात्व० छिद्रेणेति। [illegible] तद्विदंतीति गातुवित्। तादृशाः हे देवाः सूर्यं यज्ञाय
[illegible] नत्वा कृतानि। दिवागातु० ज्ञातामिति: गातुमितः [illegible] सोयं यज्ञो मनसस्पतिना अस्मदीयमनः पालकेन देवेन परमेश्वरेण
ज्ञानुष्ठानार्थं गातुं विंदत मार्गं लभध्वं। [illegible] अनुष्ठानस्य च क्रियारूपस्य चलनाद्धेतुर्वायुः कारणं। आकूत्यै० ८
वातात् वायोः सकाशात् प्रयुज्यतां प्रेर्यतां। अनुष्ठानस्य च क्रियारूपस्य [illegible] कामो भोगः। समृधिः। समृद्धिः। अ
हृदय आकूत्यादिसिद्ध्यर्थं त्वां पुरोदधे पुरस्कृत्य सेवे। आकूतिः संकल्पः। कामो भोगः। समृधिः। संसिद्धिः। अ
मतत्वं अपमृत्युराहित्यं। जीवनं। अन्नादिसंपत्तिः। आकूति० लोके रूढिमंतः कृतीराः वसेस्वरक्षणार्थं स

भर्ध्ये धनादिसमृद्ध्यर्थं च अस्यै दस्या कूतिं संकल्पं काममभि छौधिया दु/ द्विविशो यां श्वयुंजते आश्रयंति। नर्ति
द्वेनेरपेत्स्ये लम्बतंत्रा नाकूत्यादीन् भजंते। आकूतिं देवीं० अहमाकूतिं संकल्पाभिमानिनीं देवीं कार्यं बुकुर्वा
णस्य मनसः पुरोदधे। संकल्पपूर्वमेव सर्वं कार्यं मदीयेन मनसा क्रियत इत्यर्थः। सेयमाकूतिः यज्ञस्य मातृ
स्थानीया सती मम सुहवा सुखेनावस्थितुं शक्यास्तु। सकामः। कामसहितः मदीयेन मनसा यत्कार्यं कर्तुमि
च्छामि मदीये हृदये प्रविष्टमेनत्कार्यं विंदेयं लभेयं। तन्मऋध्यतां० सकामः तन्मे ऋध्यतां। एवमुनरत्रा
पि व्याख्येयं। इडादेवहूः० पितरो नुमदंतु। येयं इडा देवी गोरूपा। सेयमत्र देवहूर्देवानामाह्वयित्री। यस्तुमं
नुः सोत्र यज्ञनीर्यज्ञ प्रवर्तकः यश्च बृहस्पतिः सोप्युक्थामदानि उक्थैः शस्त्रैः आयमानो मदो हर्षो येषु मंत्र
वाक्येषु तानि वाक्यानि उक्थामदानि। शंसिषत् शंसति। येविश्वेदेवास्ते त्रसूक्तवाचः स्तोत्रवाक्यानि कारः हे म
तं रूपे पृथिवि यथोक्तानामिडादिदेवानामनुग्रहाद पराधरहितं मां त्वं माहिंसीः। त्वदनुग्रहादहं मधुमनिष्ये

मधुवत्प्रियमेवकार्यं मनसा चिंतयिष्यामि। तथा मधुजनिष्यं मधुवत्प्रियं कर्मफलमुत्पादयिष्यामि।
२. तथा मधुवक्ष्यामि मधुवत् प्रियस्य हविषो देवान्प्रति वहनं करिष्यामि। तथा मधुवदिष्यामि मधुवत् प्रि
यं प्रतिगररूपं वाक्यमुच्चारयिष्यामि तथा प्रतिगरो नाम थामोदैवेत्येतादृशो दृष्टः शस्त्रान्ते वाचमुक्थ श
स्त्रादिरूपामुद्यासं सवनत्रये कथयामि। कीदृशीं वाचं देवेभ्यो मधुमतीं देवानां मधुवत् प्रियां। मनुष्ये
भ्यः शुश्रूषेण्यां मनुष्यैर्होत्रादिभिः श्रोतुमिष्यमाणां। तादृशीं वाचं ब्रुवाणं मां शोभा॰ मेना विक्रमा
द्राभावरूपशोभार्थं देवा अनुदंतु पूर्वोक्तः प्रकारः सर्वेपि वा तथैवं तु पितरस्यानुमदंतु। मीचीनेयं वागितुप
लक्ष्यंदृ। देवा गातु॰ निर्दिदेवाक्रूपदः। अनुष्टुप्छंदः। प्रकृताः सर्वे देवाः पूर्वार्द्धेना उत्तरार्द्धेनतु परमा
त्मा प्रतिपाद्यते। हे देवाः पूर्णमासस्य दर्शस्य वा अन्यकर्मणो देवताः अग्न्यादयः यतो पूर्वं मार्गवेत्तारस्त ९
स्मात् प्रकृतयज्ञाय मार्गं उनयध्वं। लब्ध्वा यज्ञं प्रवर्तयत द्युस्पर्द्धः। किंच मनोधिपत्याचावातानव्याप्तेन प्रा

णप्रेरकेन यादेवेन स्वयं प्रकाशेन विज्ञानकोशाभिमानिना अंतरा अंतर्यामिणा स्वाभिन्नसाधनः स्वा
भिन्नः प्रकृतो यज्ञः सांगः प्रयुज्यतां समाहितं नीयतां। आत्मनो यज्ञ प्रयोक्तृत्वं तदनुसंधानस्य च श्रेयः
संपादकत्वं तन्निरीक्षाः समामनंति। विज्ञानं यज्ञं तनुते। कर्माणि तनुतेपि च। विज्ञानं देवाः सर्वे ब्रह्म
ज्येष्ठमुपासते। विज्ञानं ब्रह्म चेद्वेद। तस्माच्चेन्न प्रमाद्यति। शरीरे पाप्मनो हित्वा। सर्वान्कामान्समश्नु
त इति। इदं व्याख्यानं पूर्वं चापि बोध्यं। ममाग्न इति दशर्चोनुवाकः। ऋषिर्जमदग्निः सर्वास्त्रिष्टुभो ज
गत्यो वा। तत्राद्या। ममेति। हे अग्ने आहवनीय मम यजमानस्य यजमानगामित्वादाशिषां विहवे युस्पर्द्धिस्था
नेषु वर्चो दीप्तिरस्तु॰ यतो वयं त्वामिंधानादीपयंतोः त्वाधाने न तनुवं त्वदीयं शरीरं पुषेम वर्द्धयेम। अत एव
चतस्रः प्रदिशो विदिशो दिशश्च तस्था देवा महांमनमेनो प्रद्धी भवंतु किंचाध्यक्षेण स्वामिना त्वया पृतनाः
संग्रामान् विवाद पदानि वा जयेम। अथद्वितीयामाह ममदेवेति। हे गार्हपत्य त्वदन्वाधानेन मम यजमान

Indira Gandhi National
Centre for the Arts

स्यस्य र्द्धस्थाने इंद्रावंतो इंद्रसहिता मरुतो विष्णुरग्निश्च सर्वे देवाः। अहं महस्मिक यामाहान्येतु। ऊरुव्यापकं
१० अंतरिक्षं यजमानस्य गोपं रक्षकमस्तु। मह्यं यजमानाय मा ध्वनाने अस्मिन्कामे अभिलषित विषये वातो
नुकूलो वातु। तृतीयामाह मयीति। हे दक्षिणाग्ने त्वदन्वाधानेन प्रीता देवा मयि यजमाने द्रविणं धनं आय
जंतां ददतु। आशीर्यज्ञफलं मयि यजमानेऽस्तु। मयि देवहूतिः देवाकानं आशिष्यमस्तु। दैव्या दिविभवा होता
रः ऋत्विजो ग्निर्होतेत्यादयो ऽपदेश ऽभ्यं ह्वः। एवमग्रेपि। ये पूर्वे प्राजापत्ये यज्ञ प्रयोजित एवात्र। वनिषंत।
अयजंत। अतो देवभूतत्वात्। वयं तनुवा शरीरेण शरीरादिभिः साधनैरारिष्टाः अक्षीणाः स्याम। सुवीराः।
एवंविधाश्च प्रजावंतश्च स्याम। अत्र तिसृभिरेके कान्वाधानरक्षेतास्तिस्र आहवनीयान्वाधानपर
तयाख्यायिपाः॥ अथ चतुर्थीमाह॥ मह्यमिति। गार्हपत्यान्वाधानेन मम यजमानस्य यानिह्व्यास्वीषि १०
देवेभ्यो देयानि तानि ऋत्विजो मह्यं मदर्थं देवेभ्यो यजंतु मे मनसः संकल्पो यथार्थो भवतु। अहं किंचिदप्ये

नोमा प्रापं। सर्वे देवाः यूयं भवत्परिचारकस्य मम अधिवोचत। अन्वाधानमधिकं ब्रूत। पंचमीमाह।
देवीरिति। हे देवीः देव्यः द्योतमानाः दिशः षट्। प्रधानाश्चतस्र ऊर्ध्वमधश्च ऊर्वीर्महत्यः यूयं नोऽस्माकं
गार्हपत्यमग्निं निधानमभिलषितं उरु विपुलं कृणोत। हे विश्वेदेवा इहास्मिन्कर्मणि वीरमध्वं। पराक्रम
ध्वं। यद्वा अस्मान्वीरवध्वं प्रजावतः कुरुत। वयं च भवत्प्रसादात्प्रजया मा हास्महि। प्रजयाविप्रयुक्ता माभू
यास्म। तनूभिः शरीरादिभिर्वा कृत्स्नसाधनैश्च माहास्महि। सोमराजन् ओषधीशाद्विषते शत्रवे मारधा
म। वशमामाभूम। रधिरत्रवशीकरणकर्मा। अथ षष्ठीमाह। अग्निरिति। अग्निः हे अग्ने गार्हपत्य
मन्युं क्रोधं त्वदीयमस्मदपराधजं पुरस्तादुत्तरतः प्रतिनुदन् प्रतिक्षिपन्। अदब्धः अनुपहिंसि
तो गोपाः रक्षकः त्वं नो अन्वादधानान् अस्मान् सर्वतः पालय पापेभ्यः। किंच ते पुनः शत्रवः निगुलः
निगृहीतगतयः प्रत्यंचः ये आभिमुख्येनागताः प्रतियंतु आगच्छंतु। तेषां शत्रूणां चित्तं प्रबुधा

Indira Gandhi National
Centre for the Arts

मत्तया अमासद्दविनश्यतु॰ सप्तमीमाह॰ धातेति॰ धातॄणां विधातॄणामपि धाता यो दक्षिणाग्निर्भुवनस्य
१३ पालयिता देवः प्रकाशकः सविता अभिमातिषाहः पापहन्ता। अश्विनाव्याभुवाना उभाउभये आन्यपाह
विर्भुजश्च बृहस्पतिर्हूतो लोकस्य पातारौ देवाश्चेमं यज्ञं यजमानं च न्यर्थात् अनर्थात्सांतु। अनेन दक्षिणा
ग्न्यन्वाधानेने तिशेषः। सर्वत्र विभक्तिवचनव्यत्ययो छांदसो। अष्टमीमाह उर्विति॰ उरुव्यचा नः विस्ती॰
र्णा विविधगतिस्तारण पृजायान्या महिषः मह्नांनाम्निन्रूपं आक्राने पुरुहूतः बहुभिराहूतः पुरुक्षु विस्ती
र्णः मदक्षिणाग्निर्नोस्माकं शर्म सुखं यंसत् यच्छतु॰ किंच हरिताश्वं इपरमेश्वर्ययुक्त अग्ने त्वं प्रजायै नो
अस्मान् सुखय। नो मा रीरिषो मास्क्षीणान् कुरु मा च परादाः दान परः अग्नेः। माऽस्त्वाः नवमीमाह॰ ये
नइति। किंच नो येसपत्नाः शत्रवः ते अपगता भवंतु। वयं च इंद्राग्निभ्यामेतदाद्भिरत्रयष्टव्यैर्देवैः ता १९
न्सपत्नान् अपबाधामहे। छांदसो यं वचनव्यत्ययः। वसुर्वासयनीरुद्रः शत्रूद्रावयमानः आदित्यो

विराता दक्षिणाग्निर्मे अन्वादधाने उपरिस्पृशं सर्वेषामुपरिवर्तमाने उग्रं दुःसहं दीप्तिमंतं चेतारं ज्ञाता
रं अधिराजमधिकं राजमानमकृन्कुर्वतु छंदसि लुङ् लङ् लिटः। यद्वा दक्षिणाग्न्यन्वाधाने जवस्यादयो
पि मामेतादृशं कुर्वंतु। दशमीमाह अर्वेति। यइंद्रोगो जितो भिर्जितवान्योधनजित् योश्वजित्। तमवाचं
समीपवर्तिनममुतः स्वर्गादाह्वयामहे। विहवे अस्मत्कृते विविधाह्वाने समागत्येमं यज्ञं जुषस्वसेवस्व।
हे हरिवो अश्ववाहन इंद्र लोवयमस्वद्भिर्वेदैः। नानमेदिनं मदस्विनं कुर्मः। उपलक्षणं चैतत्। येत्र यष्टव्या
अग्न्यादयः तानाह्वयामहे। सर्वैर्यज्ञं जुषंतु तान्मेदस्विनः कुर्म इत्यर्थः। पयस्वती॰ सृजेति। सारयाचीप
यः शाकूः। औषधयः पयस्वत्यः सारवत्यः। वीरुधां लतानांसंबंधीयत्पयो निर्गतक्षीरं तदपिपयस्तत्सा
रवत्। अपांमध्ये यत्पयः सारं यच्चपयोगवादिक्षीरस्य सारं तेन सारेणसर्वेण दुद्रुमां॰ तत्सृजसंयोज
य। अग्ने व्रतप॰ धृतामिति। व्रतस्यानुष्ठेयस्य कर्मणः पालको व्रतपतिः तादृशहे अग्ने व्रतमिदमहं

Indira Gandhi National
Centre for the Arts

चरिष्यामि। तदहं व्रतं कर्तुमहं शक्नेयं शक्तो भूयासं तद्व्रतं मे मदर्थं राध्यतां समृद्धं भवतु। वा
य्वादित्यमंत्रयोरपि व्रतं चरिष्यामीत्यादिकमनुसंजनीयं। अग्निवाय्वादित्येभ्यो व्यतिरिक्तोपि यः कश्चि
१२ द्देवो व्रतानां सर्वेषां मध्ये विशेषेणास्मदीयस्य व्रतस्य पालकः तद्विषयश्चतुर्थो मंत्रः। अग्ने व्रतपत इति ए
कएव मंत्रो ब्राह्मणे संकेतः पक्षः। तदनुसारेण मननाम पदशमभित्यनुवादे। गमंत्र आम्नातः। चत्वारो ये
नेमंत्राः ब्राह्मणस्येतरः पक्षः। सर्वोन्या ब्राह्मणमिति एतावानुसारेणान्तर्मंत्रः स्यात्पुनः पाठः। इषेत्वो
र्जेत्वा। हे शाखे इदं अन्नाय मान्नाद्यलक्षणान्नसंपादनाय त्वामूर्जे क्षीरायरसाय च फलमूलादनाय छि
नद्मि इतीशेदः इदं त्वा आछिनद्मि इति शेषः। ऊर्जे अन्नाय सान्नाय्यलक्षणाय त्वा सन्नयामि। अनु
मंत्रयामीति शेषः। इमां प्राचीं महमिति। इमां पलाशशाखामहं गामिगृहे प्रापयामि। कीदृशीं प्राचीं। प्रा १२
च्यां दिशि प्रसूतां। उदीचीं उत्तरस्थां प्रसूतां वा। इषमन्नमूर्जं क्षीरादिरसं चाभितः संस्कृतां। इषे त्वोर्जे त्वे

ति मंत्रपूर्वकच्छेदनेन संपादितां। बहुपर्णां च मशुष्काग्रं च प्रसिद्धं। पशुपोषणार्थं वत्सानां च पालयित्री आई
त्वापर्णं बहुभ्यां च ताडने च वेदनाभावः शाकनं। वायवस्थोपायवस्थ। हे वत्साः यूयं वातिगच्छतीति वायवो गं
तारः स्थ उपसमीपे मातृणां पुनराधावति आगच्छतीति उपायवस्थ। अपाकृता अपि मातृभिः संगता भवतेत्य
र्थः। यद्वा। वायवस्थेत्याहेति ब्राह्मणानुसारेण वत्सानां वायुदेवत्यता मा दूरदेसंलपदः। देवो वः सविता० प्रा
र्पयतु इत्यंते। हे गावः सविता अनुज्ञाता देवः युष्मान् श्रेष्ठतमाय कर्मणे सान्नाय्याय समनुज्ञं भक्षयितुं प्रार्पयतु
त्यस्यतु। हे अघ्निया अहंतव्या गावः देवस्येंद्रस्य महेंद्रस्य भागं दधिरूपमाप्यायध्वं। प्रभूतघासभक्षणेन प्र
वृद्धिं कुरुत। किंच। अस्तेतरसाः अधिकक्षीराः बहुपत्याः दोषरहिता रोगहीनाश्च युष्मान् स्तेनः चोरः अपह
र्तुं मा ईशत। शक्तो माभूत्। अघशंसो भक्षणादिना तीव्रपापेन घातको व्याघ्रादिरपि शक्तो माभूत्। रुद्रस्य
रुद्रनामकस्य क्रूरदेवस्य आयुधं युष्मान्परिवारयतु। ध्रुवा अस्मिन्निति। हे गावो भवत्स्वामिनि यजमाने नियमे

Indira Gandhi National
Centre for the Arts

नाशितं भवत। ननु मीतिदानापहार अन्या मुनिर्यजमानेर्यरिसृजत। अपरपरंपरया चक्षुश्चभवत। अ
२५ दं यजमानस्याग्न्यानभिपर्यावर्तं इति शेषः यजमानस्य परब्रह्मा हीनि दृगा रवे अस्य यजमानस्य पश्वं रक्ष
। रक्षसो नाशयत्वाम ब्रोपगत्वानीति शेषः। देवस्य त्वेति। देवस्य द्योतमानस्य सवितुरुत्पत्त्यादि प्रतिपादनेना
नुज्ञानुगादि प्रस्यानुज्ञया अश्विनोः संवेधिभ्यां मदीयाभ्यां बाहुभ्यां देवस्य अध्वर्युत्वादश्विनोराध्वर्यवत्व
मामान्याद्‌तया राश्विनत्वं पूष्णः पोषयितुः संवेधिभ्यां मदीयाभ्यां हस्ताभ्यां हे असि त्वामाददे। यज्ञस्य
घोषदसीति। हे गार्हपत्य आहवनीयाय यज्ञस्य प्रकृतस्य घोषत्वधनेद्रव्यसाधनमसि। यमुद्दिश्य रक्षः
॥ अस्मिन्नसिदे निरूढ राक्षसस्य वैरिणां चस्वरूपं प्रतितपनेनास्तं तेदग्धं नष्टं नातिन तनीत्पनुषं २६
गः। प्रथमं जुहुमिति। इयं धिषणा मदीया बुद्धिः। तद्गूनः रक्षुर्बर्हि रक्षणभागुमागाछति। कीदृशी म
नुनाकृतामनः पूर्वकाप्रजातिरूपेण मनुना कृतास्वधया अन्नतनीक्ष्णीकृतं यस्मात्ते पूर्वे कवयोनु

शातारः पूर्वस्यां दिशि बर्हिरानयनं तिदेवेभ्यो हविर्भुग्भ्यः प्रियं। इदं बर्हिरासदं। बर्हिरिह वेद्यामासादयिष्यते।
देवानां परिषूतमसि। हे दर्भजात त्वं देवानामर्थे परिगृहीतमसि। न लौकिककार्ये। वर्षवृद्धमसि। त्वं च वर्षेण
पुनरभिवृद्धमसि। अतस्त्वापि न हानिः। वर्षशब्दः वृष्टिपरः। वर्षवृद्धया ओषधयः इत्यर्थवादात्। देवबर्हिः हे
देवबर्हिः त्वामहमन्वगनुगुणमपि माहिंसिषं। तिर्यगपि माहिंसिषं किंनु नावत्के बलं संपादयामि। दर्वनेराध्या
नाभिसृषिदमग्निनिदधाति तपरीतीति शेषः। पर्वतेराध्यासं हे देवबर्हिः। ते पर्वेराध्यासं भिंद्यां। यद्यात वछेदने
नपर्वराध्यासं नानाप्ररोहोत्सादनेन वर्द्धयानि। आछेत्तातेमारिषं। एकेनयत्नेन आछेत्तातेमारिषं। हे देवबर्हिः
तवाहमाछेत्तापिमेत्रसामर्थ्यान्माहिंसिषं। देवबर्हिः शतवल्शं विरोह। देवबर्हिस्त्वमपरिमितशाखं सद्वि
धं जापस्व। सहस्रवल्शा वियं रुहेम। वयं पुत्रपौत्रादिभिः सहस्रशाखा विविधं वर्धेमहि। पृथिव्याः संपाहि।
हे आधारत्वमूलकाष्ठरूपं दर्भमुष्टिं पृथिव्याः संपर्काद्रक्ष। अदित्यैरास्नासि। हे शुल्ब त्वं अदित्याः पृथि

ध्याः स्वानासि तस्याविधीनोकरोमीत्यर्थः। सुमेभूतात्वा संभरामि। इदमहं मुष्य समुदायस्य सेभूतायोग्यथा
१४ रज्वा संगृह्णामि। इद्राण्यैसन्नहनमिति। इन्द्राणिइन्द्रपत्न्याः शक्र्याः गतक्रतुपत्न्याः सन्नहनमसि। इंद्राणी
याः अस्मिं देवतानां संनहनसूत्रेतिभक्तेः। पूषाते ग्रंथिं ग्रथ्नातु। इदमहं जानन वर्णापको देवः ग्रंथिं करोतु। सतेमा
स्थात्। इदमहं जानन तदीपस्य कारीसग्रंथिग्रंथिरंमातिष्ठतु। इद्रस्य त्वा ऽऽ उद्यच्छे। इदं वर्हिः इंद्रस्य संबंधिन्या
श्री मनाभ्यां बाहुभ्यां मुद्गृह्णामि। इहस्पतेऽ हरामि। इदं वर्हिः तां ब्रहस्पतिसंबंधिना मस्था दीनशिरसा हरामि।
उर्वंतरिक्षमन्विहि। उरु विस्तीर्णमंतरिक्षमवकाशमनुसत्य गच्छामि। देवंगमसि। देवानां गमनसाध
नमसि। देवार्थं हविराद्याधारत्वाद्देवंगमं गमयसि न धाभिदधाति। अथ प्रमाणितेशुल्बे तृतीयविध्मसंभरणमं
त्रै। तयोः प्रथमं मंत्रमाह। यत्कृष्णो संभ्रंतति। हे अग्ने त्वं यद्यस्मात्कारणात् कृष्णः इव गोन्मत्वा नदी
यरूपे संपूर्ण कृत्वा वनस्पती आविष्टवानसि। तथा च ब्राह्मण आम्नायते। अग्निर्देवेभ्यो निलायत कृष्णो १५

रूपं कृत्वा स वनस्पतीन्प्राविशदिति। तनतस्मात्कारणात् वनस्पतिषु प्रविष्टे तोए कृविं शतिमाइं बद्द्य
मामि हे नी काष्ठानिचयः परिधयो हे आधारमभिभावनया ज्ञसमिधः संके रूपेकुर्वेदति प्रकारेसुसंभृता
संभृमग्णासमर्थेनशुल्वेन संभरामि संभृयधारयामि। त्रिवृत्सदसि। कोनुमे। त्रिवृत्सत्त्वजपरुषैर्वसश्च
मानद्यान्तुनस्यतृविवरणेपादेशमेमिनद्गति। एवंविधो वेदमोमेयज्ञमयामे पादितं स्वयमेव पवित्रेचा
त्तनमे अस्माकमतिशयेन शोधकं पयः क्षीरं हव्यं प्रेम सोम्यं करोतु। शुंधध्वं पयायै। हे पात्राणि दैव्या
यदेवयोग्याय कर्मणे देवयज्याये देवयागाय यूयं शुंधध्वं शुद्धा भवत। मातरिश्वनो घर्मोसि। हे कुंभिरूप
धाः मे चार प्रदानेन दीपकोयोंतरिक्षलोकस्तद्रूपस्त्वमसितवोदरंयंतरिक्षमद्भावात् द्यौरसि।०। इच्छलोक
जन्यवृष्टिदका द्युलोकमनिकायास्त्वं संपादितत्वेन लोकद्वयरूपोसि। किं च परमेणोत्तमेन धाम्ना हवि
र्धारण सामर्थ्येन विश्वाधारकवृष्टिरूपोसि नतोदृंहस्वदृढो भव। माह्वाः मन्नोमाभूः। अयं चार्थो

Indira Gandhi National
Centre for the Arts

१५ मातरिश्वनो घर्मोसीत्यादिविनाशकोस्य प्रथमवगम्यते। वसतो० भारं। हे शरत्वा पवित्रत्वं कुंभी सुखे० व
स्थापितं प्राणिनिवासहेतत्वेनोपकमामनस्थवस्थानेन तस्मादीनां क्षीरं शमकुंभीस्थापनता प्रतिवेधात्। स्व
क्षीरस्यापिधानवेधः अनेकैः छिद्रैः त्वनरुद्रस्य धारत्वात्। एता आ वर्तंति० पवमानाः। एताः दृश्यमानाः गा
वः आ वर्तंति अस्मदाभिमुख्येन गच्छंति कीदृशो मधुमत्सधुरसोपेतं दुग्धं दुहानाः प्रजावतीः बहुवत्साः
ग्रामोदितयो विश्वरूपाः नानारूपाः बहुधार्मयेनीः संतानरूप्या बहुभावं गच्छंत्यः उपजायमानाः कर्म
सु पुनः पुनरुपजायमानाः ताः रोगा योकेषु ष्मान् ... दृशमयनुसांगादेन मध्याप्रीतिहेतन्करो
नु० हुतस्तोको० पृथिवी० अन्यो विंदुः स्तोकः प्रोक्षो द्रप्सः तदुम यर्मापनाकनाम्नि पर्गवासिनेद्धदते
भ्रोष्ठाग्नये हुतमस्तु। विदुषां यागोयं नाको ग्निर्देवता। तदुक्तं। दिविनाको भामानिर्मादिना द्यावापृथि
वीभ्यां। द्यावापृथिव्योरिंद्रस्य ... द्यावापृथिव्यो मद्भुतः आदिनुनुमद्दुल विंद्रनो वायुश्रेयमाणानां आका

शांत्स्थितिः दृतं वा पृथिव्याभाषेभामानादनुमंत्रणवचनमाभास्य० तथा द्यावापृथिवीभ्यांन्ताहा हुतम
स्तु। कामधुक्षः० इंद्रियं० हे दोग्धः विद्युमानासुणोषु मध्येकां कामधुक्षः दुग्धवानमिनो रसमस्यं ब्रूहि इं
द्रियमिंद्रियानिवाहकारणं देहलिः इंद्रियमंपद्यते। यस्यां० द्वितं० अमूं गां दुग्धवानस्मि० यस्यां गायां
देवानां मनुष्याणां च हितं पयो वर्तते० माविश्वायुः। विश्वं कृत्स्नं आयुरस्याः माविश्वायुः। माविश्व बाः
विश्वस्य व्यचो व्याप्तिर्वस्यां सा। एवमंतरिक्षासनादिती यागोः स्तूयते० साविश्वकर्मा। विश्वानि कर्माणि
यस्यां सा विश्वकर्मेति धूलोकात्मनात्र तृतीयागोः स्तूयते। बहुदुग्धी० कन्यानां हे गोः बहुक्षीरं दुग्धीन तत्सौ
रूपं हव्यं इंद्रमन्तदीयदेवेभ्यः पुनराप्यायतो पुनर्वत्सेभ्यो मनुष्येभ्यः पुनर्दोहायकल्पतां पयः गावी शक्ता
भवतु। संसृज्यध्वं० मातपे० मातशब्देन अन्यनाविनाजलेर्वस्य भाविक्षालनमाम ...मुपलक्षयति। हेसाम
र्थ्यं वसजापकर्मिभनेन मायुमेण नंदाहर्व हेतुत्वेनच ... रमहसाप्यं धनस्यमानाप्यलक्षण स्यमानं पशा

१९ भा॰पतिपृ॰स्य प्रं शोधितं ने पुनः भवंता सोमेन॰दधि॰ हे दधि दधिरूपेण सोमेन त्वामातनच्मि तेन चातंच तेन निष्पन्नं दधि इंद्राय हो ष्यते। यज्ञस्य॰ संतनोमि॰ हे त्विहे यज्ञे दधिरूपेण त्वममस्य यज्ञस्य संततिः अविछेद नकारणमसि तादृशो लोयज्ञस्य संततिं मे यज्ञस्य धिनमविछेदमभिलक्ष्य संततनोमि उपयोजमंतत कोमि। अरस्म॰ हारंता हे क्षीरस्य नदत्तनामि अनुरक्ष लोदमः सदाः आपःदनाः सस्यः परिशिष्टं तिपिधानपात्रस्या परिवर्तते। ताभिरद्भिः कैनजल सहितेन पात्रेण विस्रवेद्यामितेयज्ञायलामहमपिदधामि। विश्नोह व्यं रक्षस्व। हे विश्नो व्यामहव्यं नवं द्रव्यं रक्षस्व। कर्मणे वो देवेभ्यः शकेयं। हे हस्तौ देवेभ्यः कर्मणे देवयागा यदाराकालिनौ युवां प्रयोक्तुं शक्नोनूयात्ता दत्त॰ त्रियमिति। हे भूपते अश्मेः पालकाभुवनपते अंतरिक्ष स्यपालक महतो भूतस्यपते धुलोकस्यापि पालक वीतानि दनानि हव्यानि आस्यदानि अस्मिन् क्रियमा णेन कर्मणि रूनाकृतकर्मवीक्षणेन हूतकारिणं पुरोहितं त्वां त्रस्राणं हृणीमहे। येन दर्शन कर्मणा अग्नि १९

रसः देवाः द्योतमानेस्वर्गं आयन्नागछन् यज्ञस्य॰ यज्ञस्य संततिर विछेदकारणमसि यज्ञकारणत्वा तां जनतायज्ञस्याविछेदायत्वां मृणामि॰ यजमानप्रजापशुसंतानादरार्थमस्मामः। इनो॰ धनं॰ विधा तोधकेपवित्रे शरत्वा पवित्रलक्षणेन द्रुवे आपिदमात्मदीवो प्राणापानौ यज्ञस्य सर्वानवयवानाप्याय यंतो संचरतो। पवित्रे॰ पवनेस्थः हे दर्भो पवित्रे स्थः शुद्धिहेतुस्थः यत्तात्मकस्य विष्णोः संबंधिनोस्थः यज्ञसंबंधिनोस्थः युवांवायुना शुद्धस्थः यज्ञात्मनः विष्णोः संकल्पमात्रेण शोधितस्थः॰ क्रियमाणस्यय ज्ञस्यशुद्धिहेतस्थः प्रत्युष्टं॰ अरातयः यज्ञप्रतिबंधकरूपं रक्षः सकुत्रवस्थनिरस्ताः संतु। धूरसि॰ मा ज्ञः अत्रधूः प्रदेशे कस्मिंश्चिच्छकटेकोलिः शाखादृष्टौ मितंप्रार्थयते॰ हे अग्ने त्वं धूः हिंसकोसि॰ ततो धू र्वं तं पापरूपे हिंसकं धूर्व नाशाय॰ किंच॰ योगाक्ष्मादिरस्मान् धूर्वति जिघांसति। तमपि धूर्वं विनाशय॰ यं वयं धूर्वामः जिघांसामः। तमपि धूर्वं विनाशय॰ हे देवत्वं असि त्वं संभृततमं पप्रितमं जुष्टतमं

Indira Gandhi National
Centre for the Arts

प्रियतमं वह्नितमं हविष्टमं वोढृतमं देवहूतमं देवाह्वानतमं देवानां संघं च। हे शकट अकुटिलं हविषो धारक
२० मासि। अयाः। दृढोपि दृढो भव। मा विनाशय। मित्रस्य। मित्रं। हे व्रीहि समूह जगन्मित्रस्य सूर्यस्य चक्षुषा
त्वामवलोकयामि न वहुदृष्टि चक्षुषा अतो मा भैषीः मा कंपिष्ठाः अहं तु त्वां न मारयामि। उरु वाताय। हे क्री
प्यमाण हरालवमेतेन विधानेन ततः प्यपनयनेन नयाप्रवेशाय विस्तीर्णं भव। वित्तिः स्रुकः मामाध्व
र्युः। पूर्वं प्रजापतिश्चित्तादिभिः स्रुगादिभिः तैः संकल्पाय यज्ञेन सर्वं सृष्टवानिति तादृश्येन स्तुतयज्ञः
स्त्रयते मित्सक्षालक्षणः यथ न संकल्पश्चित्तिः सा एवा ... स चेदममितिमविशेषं चिंतनं देवा
ऽदं। स एव विषयावाग्विदिः इदं मे वंम्यास इमि न ज्ञानं विज्ञानं तदग्नीदाग्नीध्रः वाचस्पतिः वागिंद्रियमे १३
व होता मनः प्रजापतिरेव उपवक्ता ब्रह्मा प्राण एव हविः पुरोडाशादि साम अनुष्टुह एवाध्वर्युः। देवस्य त्वे
ति व्याख्यातं। अग्नये जुष्टं। अग्न्यर्थं निर्वपामि पृथक् करोमि इति सा पृथिव्युं नयाग्नीषोमादीनां

व मुनरं यथा देवतेभ्यो ध्येयं। अग्निः २० अन्या द कर्मणि देवतानामादानार्थं तमग्निमाहूयामि। इदं कर्मणि
यानं देवानुद्दिश्य तु द्रुमः नः प्रियतमः प्रियान् देवानाह्वयामि। आहूयमानाः देवाः सुमनस्यमानाः सौमनस्यप्रा
प्ता आगच्छंतु। आगत्य च मे अस्य यज्ञस्य मदीयमिदं हविर्दीयंतु न क्षयं तु। हे देवस्य त्वेति यथा देवतं पूर्ववद्व्याख्ये
यं। इदं देवानां। अयं निरूप्तमिदं देवानामेव स्वं। इदमु नः सह। इदं तु शकटस्थं देवैः सहितानामस्माकं। यागोत
रकालमन्नं भोक्ष्यमाणत्वाच्च। स्फान्यैलानाराते। हे हविः त्वामिदं द्वेलामभिमंत्रयामि। नत्वा दानाय किंतु
देवेभ्यो दातुमेव। सुवः। ज्योतिः। स्वर्गमाय नन्नस्वर्गस्थं सर्वं यागप्रदेशमभितो विशेषेण वक्ष्यामि। स्वर्ग
प्रकाशनीलोत्पमाहवनीयं पश्यामि। दृंहतां पृथिव्यां द्यूलोकभूलोकयोरस्मत्कृताद्दानाद्भवंतु। उर्वंतरिक्ष
मन्विहि। उरु विस्तीर्णं अंतरिक्षमवकाशं अनुसृत्य गच्छामि। अदित्यास्त्वोपस्थे सादयामि। हे हविः त्वां पृथि
व्या उपरि सादयामि। अग्ने हव्यं रक्षस्व। हे अग्ने गार्हपत्यात् आहवनीयवा। इदं हव्यं रक्षस्व। देवाः। ग...

Indira Gandhi National
Centre for the Arts

आपः सविताप्रेरकोंतर्यामी वो युष्मान ऊर्ध्वं पुनातु केन साधनेन असौ वा आदित्यो ऽछिद्रमित्यादिरूपेण दर्भो वि
१८ धन्नरूपेण जगन्निवासहेतोः सर्व्वस्य रश्मिरूपेर्दर्भोव पवित्रा। आपो देवी० तत्रैं० हे आपो देव्यः प्रकाशमाना
यूयं यतो ग्रे पुवः शुद्धिहेतूनां दर्भादीनामपि प्रोक्षणेन शोधकत्वात्। अग्रे पुनंतीत्यग्रे पुवः अग्रे गुव स्त्व
प्रवाहरूपेण शीघ्रगामिन्यात। गंतव्यां मनुष्याः देष्यांप्यग्रे गच्छतीति अत इमं यज्ञमविघ्नेन अत्र प्रथमं स
मास्मिं नयत। यजमानं च अग्रे प्रथमं सम्मानिसमानानामुपरिस्थापयत। किंच वृत्रासुरवधे युष्माकमिं
द्रस्य परस्परापेक्षा जाता तत इंद्र समा यूयं किंनामकर्तुं न समर्थाः सा चापेक्षा तस्य वज्ञमित्युक्त्वा प्रसि
द्धा। प्रोक्षितास्थ। एतादृशा यूयं मे त्वेण प्रोक्षिताः स्थ। देवस्य त्वा० व्याख्याते। अग्नये० शामाभ्यां हुरा २८
र्हीयाः अस्मादिभ्यः प्रियं वो युष्मान् प्रोक्षामि। शुंधध्वं० यस्याम्यै० व्याख्याते। अवधूतं० अत्र तत्रः। पत्न
वि प्रकारि रक्षो अस्मादरातयश्च निरस्ताः भवंतु। अदित्या० रोजु० हे कृष्णाजिन त्वं भूम्यास्त्वग्रूपमसि।

अतो भूस्त्वां प्रतिगृह्णमदीयं मंत्रागित्स्येव जानातु। अधिषवण० वेनु। हे उलूखल त्वं सर्वस्यावघातस्या
धारभूतं गन स्पतिज न्यं नामिना दृशं त्वां कृष्णाजिनस्त्वग्भूमिस्त्वक्प्रतिगृह्णमदीयामिति जानातु।
अग्नेस्तनू० गत्स्त्रामि। हे पुरोडाशीयद्रव्य मम हृत्वमग्नेः शरीरमसि यतस्त्वां स्वीकुर्वाणैः पटुभि
र्वाती। किंच वाचः प्रवृत्तिकारणमसि अतस्त्वां देवभक्षणाय उलूखले प्रक्षिपामि। अद्रिरसि० शामिद्वा।
हे मुसल त्वं वृद्धो वनस्पतिविकारोसि त्वमिदं हव्यं देवार्थं भक्षणविकारो भूयतुषापाद्यानयनेन मुद्
मां तं यथा भवति तथा शमय। हविष्कृदेहि। तुषादिविमोकद्वारा हविःसाधनमवधातः पत्न्यादि वा
हविष्कृत् हे हविष्कृदेहि। हविष्कृदेहीति ब्राह्मणस्य हविष्कृदागहीति राजन्यस्य हविष्कृदाद्रवेति वैश्य
स्य हविष्कृदाधावेति शूद्रस्य। यजमानस्य निशपः। शूद्रस्येति निषादस्य पत्न्यर्थं। इडा देव० मदंतु। व्याख्या
ते। इयमा० जेष्म०। हे पाषाण हविस्त्वमिदं न पं स्यादुत्तरं च यजमान आनयतीति देवेभ्यो वदः। हे यज्ञायु

Indira Gandhi National
Centre for the Arts

यानि। इदमुपलाश्मनो वा मुखं समाभिव्यक्तिमदिदं हविरिति देवेभ्यो वदतव्यं त्वनेन ग्रावेणाधेरि
१५ संधानं ते पाषाणः वर्षवृद्धमसि। इदं वर्षवृद्धं वेणुनिष्पन्नत्वात्स्वमपि वर्षवृद्धमसि। प्रति त्वा० वेत्तु।
शूर्पाद्याशीयवर्षवृद्धं तोत्त्वकीयत्वेन शूर्पमभिमन्यते। परापूतं० अगतयः रक्षो गतयश्च विप्रकारि
णः पराकृताः रक्षसां भागोऽसि। इदं तेनोपवर्तीति वदन् ब्राह्मणं हस्तकपालयोर्विकल्पः। पुरोडाश
तंत्रेषु चर्वादितंत्रेषु हस्तो व्यवतिष्ठते कपालाभावात्। अद्भिः कपालं संस्पृश्य प्रज्ञातं निधाय
प उपस्पृश्य वायुर्वो विविनक्त्विति चंदेवायः सविता० प्रतिगृह्णात्विति पाण्यां तंडुलान् प्रस्कंदयित्वाद
धो नदश्मस्थुना दष्यामि गदष्यो पाय आशामदत्स्वेक्ष्य त्रिष्फलीकर्तवा इति संनयति। वायुर्वो वि १८
विनक्तु इतंडुलाः शूर्पे न्याय्यतः शुष्मान्कणेभ्यः पृथक्करोतु। देवो वः सविता हिरण्यपाणिः प्र
तिगृह्णातु। हिरण्यमंगुलीयकं पाणौ यस्यासौ हिरण्यपाणिः हिरण्मयपाणिर्वा सविता देवो वः

युष्मान्स्वाच्छयतः प्रतिगृह्णातु। प्रतिगृह्य पात्र्यां प्रतिष्ठापयत्वित्यर्थः। त्रिष्फलीकर्तवै० अधूतादिति।
इदं हविष्कृतं फलीकरणं त्रिः कर्तव्यं। इदं हविष्कृतं फलीकृतान् तंडुलानसंपृक्तान्। त्रिष्फलीक्रिय० प्रवद
तादितः। त्रिवारं फलीक्रियमाणानां तंडुलानां संबंधिनो ये गोनिष्ठ्यूतांशः कणा इत्यर्थः तंदूषपालाश्च
सो भागधेयं तत्कणादिरूपमेगंद आपः इतः अस्मात्स्थानात् कर्षेणान्यत्र वहतात्। कस्मा० पुनर्नु
इयन्त्वो पृथिवी प्रजापतिर्योजयति। इदानीमपि मयो जयतु। दिव० नेनु। इदानीं तं फलोकस्य धारयित्री
असि। तस्मात् कृष्णाजिनस्य पायाम्मेमन्त्वमिमंत्वानभिमन्यते। धिषणा० वेनु० इदं पृष्ठमभिज्ञतया धि
षणासि इदं ततः पर्वतावस्थानमर्हसि। तादृशं त्वां दृषत्कृष्णाक धारिकाशम्या अभिमन्यते। धिषणा० वेनु०
इदं पर्वतं पृष्ठमभिज्ञानयात्वं धिषणासि पर्वतसंबंधिनी चासि। तस्मात्त्वां पर्वतसंबंधिनि दृषदमभिमन्यते।
देवस्य त्वा० व्याख्यातं। अन्नं कुरुमिति। स्वदृष्टम। धान्यमसि०। दृशानियमः इतं तंडुलसंघातं देवानां प्रियं

Indira Gandhi National
Centre for the Arts

त्वां अधिवपामिपर्युं यतस्त्वं प्रीतिसाधनमसि। अतो देवान्प्रीणय० यज्ञपतिं० विष्णुं। यज्ञनियम्। यज्ञनियं
तारमधिनुदि० प्रीणय० शेषं स्पष्टम्। प्राणाय त्वा। उच्छ्वासनिश्वसनसंबंधिरूपाः प्राणवृत्तयः प्राणा
२० पानव्यानाः हे उपवेष प्राणाय त्वां प्रोहामि। एवमुत्तरयोर्मंत्रयोरपि। दीर्घां० षधाम्। यजमानस्यायुरर्थं अनु
मव च्छिन्नकर्ममंततिं हेतु रूपां दीर्घां उपवेषं धारिनवानसि। देवो वः ० प्रतिगृह्णातु। हिरण्यमंगुलीकं पा
णौ यस्यासौ हिरण्यपाणिः हिरण्मयपाणिर्वा मविता देवो युष्मान्पात्रिस्थतः प्रतिगृह्णातु प्रतिगृह्य पात्र्यां
प्रतिष्ठापयतु इत्यर्थः। असंवपंती० तान्रूपत्निदामिवा असंवपंती तंडुलेषु इन्यांतरं किमप्यप्रवेशयंति
इतिविचारण्याः। दध्यानपत तितथेत्यर्थ इति करावस्यामीपिंपंपवर्णां कुरुता नित्यपिष्टानि अग्ने निसृष्मा २०
णिकुरु। ध्रुवमसि ब्रह्मस्वस्था इह उपवेदत्वमेगारधर्षेणनममर्थोसि अतो ब्रह्मगृहादितेपुरा इशा स्यं देवान्वं
यच्छ। अपा० अहि हे गार्हपत्याग्ने मानिः शास्त्रियेपाकसंत रणा आमं द्रव्यमत्ति न तु पाकार्थंस्थापितं स्वपा

कं क्रं गोति तमपनीय मांस्थि। निष्क्रव्याद् ७ सेध। हे गार्हपत्ययो निकीलं किं केऽमां ममत्तितमपिनिषेध। आदेव
यजंवह। हे गार्हपत्ययो निर्देवान्यजनितमावह। ध्रुवमसि० पर्यूह। हे कपालत्वं दृढमसि। अतः पृथिव्यादी
न दृढीकुरु अस्य यजमानस्य समानजातीन्यतिः सेवकान्कुरु। निर्दग्धं० अराजयः। अनेनांगारस्थाप
नेनाग्निना कपाले भाण्यितं रक्षोनिः शेषेण दग्धं अरातयश्चा धर्त्रं० पर्यूह। हे कपालत्वं धर्त्रं धारकमसि। हि
तीयत्वाद् द्वि तीयत्वादेतांरक्षणं। शेषं पूर्ववत्। धरुणम् पर्यूह। हे कपाल धरुणं कपाल धारकमसि। तृतीयत्वाद्वि
मिति। शेषं पूर्ववत्। धर्मासि० पर्यूह। हे कपालत्वं धर्मं धारकमसि। योनिः प्रजाकारणं। शेषं पूर्ववत्। चि
तस्थ० पर्यूह। बहुवचनमादरार्थं। हे कपालत्वं निदमि उपचितमसि। ततोऽस्मै यजमानाय प्रजादिकं पर्याप्त
तः संपादय। प्रजादेः प्रत्येकमुपचयविवक्षया पृथक्त्वोक्त्या ज्ञातमिति तस्मादिति पदावृत्तिः। भृगूं०
ध्यो हे कपालानि भृगुंगिरोरूपाणां देवगणसंबंधिमानको रूपेणाग्नेनाग्निना तप्तानि भवत। यानि घृ० अ

Indira Gandhi National
Centre for the Arts

ध्वयुरूपाव धसः यानि पर्मे कपालानि॰ पर्मे॰ दीप्तेव न्हौपूजार्थं वहुवचनं। तादृशा न्यपि कपालानि विमो
२१ कुंस नार्थावि द्रावापृथ्व्य्नः पोषकस्य यजमानस्य याग न्वेव व्रतस नातेमतितिदुं को। दिवस्य त्वेति व्याख्ये
मेदूर्ववत्। समाधेः॰ स स्त्प ध्वं। हे आपा भद्रेती भिरद्भिः पिष्टैर्वी सम गम तमंग छध्वं। हे पिष्टरूपा ओषध
योपूयमुद करसेन संग छध्वं। किंच हे आपो यूयं रेवतीः सर्व सस्याभिवृद्धि हेतुत्वात्। तद्वारा मधुमतीः म
धुस्वभावतो माधुर्यवत्यश्च जगती। हिंजंग मन्दः प पश्य भिवृद्धि हेतु तया पशु रूप धन युक्ताभिः स्वभाव
सिद्धस्वादुत्वेन माधुर्यवतीश्च पिष्टरूपाभिस्ताभिरोषधीभिः संसृष्टा भवत। अद्भ्यः॰ पृ स्य ध्वं हे पिष्ट
रूपा ओषधयो यूयं द्वविंम न्द्रउत्सन्ताः अतो अद्भिः संपृक्ता भवत। जनयत्यै॰ यामान्धां॰ हे पिष्ट रावि
नोपपृतां जनयत्यैव यजमानस्यपुत्र शंगाति तन्निष्पन्न प्रजोत्यनोपदत्तां युष्माभिः संदेनेन सम्यक् कृत्वा मि २२
श्रीकरोमि। किंच अग्न्यादिन्यः पुरोडाशाय दत्तारपि च लोके चोमि। मखेस्य शिरोसि। हे पिंड त्वं यज्ञस्याधे

नेमि। प्रधानात्यवयवत्वार्थः। घर्मोसिविश्वायुः हे पुरोडाश त्वं कपाले न स्थापितं ... संपर्क दीप्तो देवता
यो यत्तेन कुत्स्नायुः प्रदश्चासि। उरु प्रथस्व॰ प्रथतां हे पुरोडाश गण्डमुरु विस्तीर्णं यथा भवति तथा प्रथुर्भव। तेन समा
नस्त्वा रुप्रथतां। मदीनां॰ त्वा थे॰ महीशब्दस्य गोरर्थः। हे आज्य त्वं गवां पयोमि मासा नन्यत्वात्। ओषधी
नो रसश्चासि परंपरया तज्जन्यत्वान्नादशस्य सयहितस्य न च स्व रूपं देव भागार्थ पात्रे निर्वपामि। त्वं च गन्धी
धा। हे पुरोडाश त्वमद्भिः श्लक्ष्णी भूतत्वं च श्री कुरु॰ अंतरिक्षं॰ रातमः। पश्चेति करतलेन रक्षो नानि॰ ध्रुव
श्च व्यवहितादंतु देव स्त्वा॰ धाक। हे पुरोडाश सवर्षिष्ठः तिप्रवृद्धोनाके नाये केनाम्य गतोत्वामधिश्रिस्यविनादि
नः पक्वं करोतु। हे पुरोडाश अयमग्निः तव शरीरमतिभस्मीभावातं मादहतु। अग्ने हव्यं रक्षस्व। हे अग्ने त्व
मिदं हव्यं दाहात्परिरक्षस्व। संब्रह्मणा पृच्यस्व। हे पुरोडाश ब्रह्मणा मंत्रेण संपृक्तो भव त्वां मस्मनाध्यू
हामि। एकताय स्वाहा॰ द्विताय॰ त्रिताय॰ एकतादयः संज्ञा शब्दाः देवता विशेष वचनाः। यद्यपि त्रादयः। यथा

Indira Gandhi National
Centre for the Arts

हवोधायनः। कोमुख्यत्वेकृतः कोऽहितः कश्चितः। पितापितामहप्रपितामहइत्येके। पृथिव्यंतरिक्षंद्यौरित्येके।
२२ अग्निवादित्यावेत्कृतइत्येकेइति। अयंवेदः० करोत्विति। अयंवेदः पृथिवीवेदरूपा असुरेभ्यश्चविंदत अ
नुक्रमेणालभत। अतएवब्राह्मणमाम्नायते। वेदेनवैदेवाअसुराणांवित्तमित्यादि। कीदृशीपृथिवीदुर्लंगा
पस्थांतत्रापिगहनंदुष्प्रमशक्यस्थानेतत्रापिगेहेचैवव्यापेषुप्रदेशेषुसतीचर्न्नमानांतथाचब्राह्मणआ
म्नातं। वराहोयंवाममोषः सप्तानांगिरीणांपरस्तादित्यादि। सतादृशोवेदोयजमानार्थंलोकेग्यानविशेषंवि
दत्तुलभतो। तत्सिध्यर्थंभूरिकर्मा बहुव्यापारोयंवेदः यज्ञमच्छिद्रमविकलंकरोतु। वेदेनवेदिं। विश्वदानिः
असुरैर्हृतांपृथिवींदेवाः पूर्वोत्तरभागाभ्यांसंस्कृत्यपूर्वंवेदिमकुर्वंस्तांचैववेदिंकेनापिनिमित्तेननिजातां २२
पुनर्वेदेनलब्धंतस्माच्चवेदिः प्रथिमरूपामतीपार्थिवानिब्रीह्यादीनिविस्तारवती। किंच। मासवैपुरु
उनेभ्यंनरारमणीयंगर्भंबिभर्तितस्माद्दर्भाः सर्वस्यफलस्यदातायज्ञपुरुषउत्पन्नः। अतोवेदेनावेदिंमा

कार्यसिध्यर्थः। देवस्यत्वा० व्याख्यातं। इंद्रस्य० शततेजाः। हेस्फ्यत्वमिंद्रस्यदक्षिणोबाहुरिवसमर्थोसि। सह
स्रसंख्यानांशत्रूणांमारकः शतसंख्याकतेजाः पुरुको पुरुत्वोऽस्य। वायुरसि० तेनवधः। यथावायुस्तीक्ष्णामग्नि
ज्वालामुत्पादयतितिग्मतेजाः। तथात्वमपिवक्ष्यमाणस्तंबछेदरूपंतीव्रकर्मकुर्वन्तिग्मतेजाः। वायुरसि। श
तभृष्टिः शतसंख्याकाभृष्टिः शत्रूणांसंतापरूपेणज्वलनंयस्यसशतभृष्टिः वनस्पतेर्विकारोवानस्पत्यः द्विष
तोद्वेषंकुर्वतोवैरिणोवधः वधहेतुरसि। पृथिव्यैवर्मा० यथवा हेदर्भनिधीयमानेत्वंपृथिव्यावर्मकवचमिव
प्रहारस्यव्यवधायकासि। उत्तरार्द्धंस्पष्टं। पृथिवि० सिद्धं। हेदेवयागार्थंयमस्तेवेदिरूपेपृथिवित्वदीयओष
ध्यामहंमाविनाशयामि। अपहतोररुः पृथिव्यै० अररुनामकोऽसुरः सोत्ररजोपनयनेनपृथिव्याः सका
शादपहतः। व्रजंगच्छगोस्थानं। हेतृणसहितपांसोगोस्थानंव्रजंगच्छ। वर्षतुतेद्यौः। हेदेवयजनतेआधा
यनाय गृशद्वेपलक्षितः पर्जन्योवर्षतु। वधान० मामोक्। हेसवितर्देव अनेनमत्तृणपांसुरूपेणव

Indira Gandhi National
Centre for the Arts

२३

...तं दृष्टारं द्विष्टं च परमस्यां परावति तं दूरदेशे बधान ततः च उरु बद्धम् अतो बंधनान्मा मुचः। अपहतो ररुः। देवय
जन्यै। अथ मा ध्वनखनेन देवयागयोग्यायाः पृथिव्या अररुर्नामासुरः। अपहतो० यजनः। द्वाभ्यां पर्याभ्यां
देवयजनवहिर्भूतो ररुः पृथिव्याः वेदेरनेनापहतः बधान दे० मास्कान्। देवयजमानतत्र अररुः भ्रातृव्यः स्तं
बधान हृदयादिं मा गउतु। फलविचित्रं ववित्त्वः श्रीधनामित्यर्थः। प्रवाई देवं व्याख्याताः। वसवस्त्वा० छंद
सा। अध्वर्युरात्मानं वसुरूपेण मन्यमानः गायत्रं छंदो रूपेण ध्यायति हृद्वेदेर्दक्षिणतो वसवो गायत्रे
ण छंदसा परिगृह्णंतु। एवमुत्तरयोरपि। रुद्रास्त्वा० दसा० आदित्या० दसा। व्याख्यातम्। इ
मां नरीम्पत् हिनराः वैदिकत्तोः पुरुषाः सवितुः प्रेरकस्य देवस्य सवे तु ज्ञायां सत्यं अयं यजमानः य
थानरिष्यन् विनश्येत् तथा पृथिव्यां आभावुपरिदिदः स्वर्गस्य हेतुः वर्ष्मेनुक्लिप्त प्रदेशा यूय मागत्य वेदिं
कृणुत। कीदृशीं यस्यादिमंतां तथा शंतस्य अर्थः। देवस्य० वेधसः। वेधसो विंतं मानुज्ञातुः परमेश्वरस्यानुज्ञया २३

मिदं स्वजनमदाःकर्मकुर्वन्त्वतो दृष्टः पितरदनुज्ञयाकरोमीत्यर्थः। ऋतमसि० ऋतंमलं तत्र सत्यं वेपाहवि
षिफलेवतं भागं कर्मण्यपि निर्मितं भवति ध्यायते। हे वेदे त्वमधुरे दैवेभ्यो नवत्वात्। ऋतसदनमसि हे वेदे त्व
मध्यामि नाम कालसाधनत्वेनमत्यस्यहविषः स्थानमसि। ऋतश्रीरसि हे वेदे अवश्यंभावित्वेन सत्येकाले
नविहीरेण त्वया श्रीयते इति त्वं ऋतश्रीरसि। धा असि० यतंतो विविधं रचरणेन शह्वनं उन्नरूपाभुभिर्दनगं
स्रोधारणं विरपूतहृतंऋत्विजो विरपृणः। तासंतानं प्रथम्भा द्रीशादिभ्यः श्चेतिडतिटि लोपः इदं साधुवि र
पुत्राः ऋत्विजो यस्या वेद्या मा वेदिः विरचूशीनीतस्याः स्तोदमंतं धोधनं विरस्ति त्रिलिते हे विरस्तिर्नवे
दे ऋरत्याक्रमेण पाशो देद्भ्य अरगो विसर्पणात् निगमनात् पुराणत्वं वेदिक स्वधि धोधारयित्री असि स्वधारा हि न
एतमेततपेच त्वामन्विन्स्यादिनो क्षेपन केपि राटिकमुपलक्ष्यंतंते नापि युक्तासि। अत एव कुरुत्वधार
णां दिव्यौ णां चासि। पुरोडाशादिरूप धनवत्वाद्धन्वी चासि। जीरा जीवनशीला दान वाहविषां दातारो या

Indira Gandhi National
Centre for the Arts

वज्रीवादिशास्त्र वेष्टिता यजमानाः यस्यां पृथिव्यां माजीरदानुः द्वितीयार्थे प्रथमा यह्नीराश्वतदानवश्च छोद
२५ सोमपवचनन्यस्यः ॥ ता द्रुग्णाः पूर्वैव यजमानाः वदिरूपो यो पृथिवीक्रुस्त्वम मेरासुमोः राकाशाद्दर्भमादाय वेद
नस्य मनाक्रिरणसार्द्धस्थापितवेतः ॥ मा माद्रुग्ण० छिनद्मि इदं द्याः यः शत्रुः माद्रुग्णातासर्वमुक्तेन मननमायश्च
नानाधिक्षोपरत्वान्स्य ब्रह्मणा अनेन दर्भेन वेदाध्म नादिनाक्षीणानताः विरश्येन द्यौ इमा सर्थेकरोति
यश्च पातेन नदुग्णान्त्वमवतोनत्व सुता दृषत् शीलिन इदं पनादिक्रमेन वक्तृत्वादिलोकरूपेण हृदयेन वदे
शिरः दुतस्य सर्वस्य राजेः शिगेव त्वेण यनुवाम्ल उपमृ ष्टिनाः आनुष्टुभ् पामि हस्तुवादयः दुष्यान
तजिष्ठन आतिताक्ष्णेन अग्नेक्तेजसाग्निः श्वेतपामि । गोष्ठं मा० मार्ज्मि । हे सुवर्ग वो स्थानेना विनाशयामीत्यभि
वेसधाजिनमन्त्र वंतेस पत्नसाहंयरिहंतारं त्वोसन्धकुलो धयामि । यावेमा० मार्ज्मि । हे नुहु० वा वेप्राणं च मादि
नाशयामीत्यभिप्रेत्यादि रत्नितः अत्र नुफादानांस्त्री लिंगत्वम् अतो वाजिना मिला दिस्त्री लिंगनिर्देशः । चक्षुः २५

संमार्ज्मि । हे उपभृत् चक्षुः श्रोत्रं मा विनाशयामीत्यभिप्रेत्यादि पूर्ववत् प्रजां० मार्ज्मि । प्रजां पुत्रपौत्रादिरूपां यो
निं त्वारलं विप्रादिरूपां च मा विनाशयामीत्यभिप्रेत्यादि पूर्ववत् । स्वं० मार्ज्मि । हे प्राशित्र हरण यजमानस्य पशु
न्यः पश्नाम्नोरूपं च लोमा विनाशयामीत्यभिप्रेत्यादि पूर्ववत् । दिवः० स्वाहा । दिवः आकाशात् शिलिन्त्वं वृष्टिरूपं
अयतनमवयवप्रसृतमिदं दर्भरूपं पवित्रमस्तु भमेरूपयो श्रितेश नशाग्वनेनतदर्भं जवयं वैरिणनाशय ।
मनः इदं दर्भरूपं हुतमस्तु० आशा० यकं० यावज्जीव कैरनुसारिणां मत्वा सौमनस्यादि फलान्याशासानाय तेना
मनोशोभनकर्मलोकं सुखं । सुक्ते० सुज्याते । आशिषः समृध्या इति मया शास्त्रीयं कर्म क्रियते । अतः सौमनस्यादि
रूपामेयमाशीः फले युज्यतो अनेनाभिप्रायेणाशीः समृद्धा एव भवतीति विधीयते । सुप्रजसः० उनमः । हे
अग्ने वैरि विनाशकं केनाप्यतिरस्कार्यं त्वो शोभन प्रजायुताः शोभनः पतियासांताः त्वत्प्रसादात् केनाप्य
तिरस्कृता वयमुपसीदामः इदस्य पत्नीद्धाणी सानकदाचिदपि विधवा भवति तद्वदहमापयावज्जीवनत

धयाभ्यासं। अदितिर्देवमातानदरं सुपुत्राभ्यासं। हे गार्हपत्य अस्थूरिलं सर्वं स्थूरं तं सर्वार्थसाधनं संपूर्णं
२५ तो सुप्रजास्त्वाय शोभनापत्यलाभाय उपनिषीदामि। मम पुत्राः शत्रुघ्नाः शत्रुघ्नाः हन्तारो भवन्तु। अथो दुहिता
च मे विराट् विराजमाना भवतु उतापि अपि च अहं मानस्मि लोके ईळद्। असानि सं तपा सम्यक् जपित्री पत्नी ना
थापत्युः सम्यक् स्यर्थे षष्ठी। तन्मे वच्छन्तः गच्छन्ति। पत्नी श्लोका यशः श्लाघा उत्तमा अस्तु। पतिर्मे पामा मे पत्न्या इता
मित्यर्थः। ऊने तिरिक्तं धीयाते। तस्मिन् मिथुनं पत्नीकर्मण्यनुष्ठीयमाने समिध्यग्न्यगते नानुष्ठितं स न्यूनं भ
वति। तत्रानु प्रदेशेन तदेव अतिरिक्तं। तेनाननुष्ठितमन्नया पत्न्या प्रीयते नुष्ठीयतं। अग्ने गृहपतिः। हे गार्हप
त्य अग्ने त्वां तव समीपे अवस्थातुमनुजानीहि। हे देवानां पत्न्यः इन्द्राण्याद्या मां पत्नीकर्मणां यूयं अनुजानीध्वं। प
त्नि पत्नी समीपे अभिध्यास्यर्थः। ते नायमर्थः। हे देवपत्न्यो युष्माकं गार्हपत्यापरभागः स्थानं। अतो वा न मो
नु। अत्रावस्थितानां मामाद्रिं सिद्धा मद्रीनं० त्वायाम्। हे आज्यतेजो वा अपयानां परस्य भ्रातृत्वं परम


न कार्यं त्वात्। न त्वां अदृष्टेन नरोगानुपदर्शनेन चक्षुषा शोभनप्रजासंपन्न ये अवेक्षे। तेजोसि। हे आज्य त्वं तेजोरूप
मसि तत्वात् न म्यधिश्रयामीत्यर्थः। पत्न्यभावे तेजोसीति लुप्यते। गार्हपत्याधिश्रयणं तेन इति मंत्रस्य आदिर्य
स्याधिश्रयणस्य अतस्तेजोदित गार्हपत्येधिश्रयणं पत्न्यभावे लुप्यते। तदीक्षणाभावात्। तथा च श्रुतं
अमे ध्यं वा एतत्करोति। यत्पत्न्यवेक्षते। गार्हपत्येधिश्रयति मेध्यत्वायेति। तेजोनुप्रेहि। अत स्तेजोमेवमाह
वनीयमनुप्रवेष्टुं गच्छ। अग्निः०विनेना। हे आज्य अयमाहवनीयो अग्निस्तदीयेन तेजसा पनयतु। आज्यमग्निः०भ
क्षीय। अत्र वैश्वानरमित्यादिषु चत्रिषु पदेषु मस्येकमसीति परमनुवर्तनीयम्। तथा चैतानि ह्यावेतानि वाक्या
नि संपद्यंते तेजोरैते रायस्पोषश्चेत्यादिप्रयुज्यन्ते। अंजि धातोर्गत्यर्थादुत्पन्नमाज्यं प्रापकं नाम। इतेनाहिंहोमार्थो ज्वालाग्निः
प्राप्यते मा हिंसी मा नेककर्मफलं तदर्हं नीति मसि प्रमिद्धत्वात् सकर्मक न नाधनत्वं मसम्याध्य सनमि। सतोक
र्मसं ज्योतिष्टोमे प्रवर्तमानाय यजमानस्य तदृशा ऋत्विजः संतः परस्परद्रोहशंकामपनेतुं तान् नष्यसंविकन।

Indira Gandhi National
Centre for the Arts

ज्येस्य शंतिमो यस्य शर्मः स लोकः मर्त्तस्य कर्मणो ऽध्यक्षेऽसि। हविरसि प्राधान्येन हूयमानमसि। पुरोडाशादि हृ
२६ विर्भोज्यान्येन वत्सकर्मशेषसमापनात्प्राधान्ये। विश्वेषां नराणां संबोधि विश्वानरो विश्वेषां देवानां संबोधि वै
श्वदेवं प्रमिहोद्यास्य स भोज्यत्वेन हविष्ट्वेन च उभयसंबंधः। उग्रतधु मनुसवनेनो द्युवितवलं। सत्योजाः
सत्यवलमाज्यमस्य वलमयितये। जम्बुद्वीपनस्य प्रत्यक्षत्वात्सहः शत्रूणामभिभवनसमर्थं। सहमानं
तदभिभवनेवर्त्तमानं। सहस्वानतीः अस्मदमित्रानभिभव। सहस्वानतीयतेः येनत्सतनः शात्रवं कर्तुमेसम
र्थमनसा शात्रवं कर्तुमिच्छति तानपि अभिभव सहस्वप्तनाः संग्रामान्विवादकानिवाभिभव। सहस्ववत
न्यतः येप्रत्यक्षतः संग्रामं विवादं वा कर्तुमसमर्थं मनसा कर्तुमिच्छति तानप्यभिभव। सहस्वी वीर्यवतम्न
मितरद्दार्थेभ्यः सहस्वगुणवीर्यहेतुरसि तस्मात् जिह्व एव मर्मिन दस्यना वलेमोनानद्रीरणाय। आ २६
ऽस्य आज्यमसि लौकिकं फलसाधनं कृष्यादिकं सर्वं तत्कदाचिद्वलाद्युनावेनव्यभिचारान्नमुच्येत। मस्त्वे

तु कदाचिदप्यव्यभिचारात्सत्यमसि। सत्यायुरसि सत्यभूतमायुर्यस्मिन्निति सत्यायुः। आज्यनिष्पन्नेन
कर्मणा नानिवेहयदायुः प्राप्यते तन्नव्यभिचारीति सत्यायुः। सत्यशुष्ममसि सत्यवलमसि। जम्बुद्वीप
नयलेपर्यंतु केऽहन्तु रूनद्रानवन्नमुज्ञेन सत्येन त्वाभिघारयामि तादृशं त्वां चक्षुषा पश्यामीत्यर्थः। अन्यथा ना
ज्यमिति मर्सेनेति द्रूषात्। चक्षुर्वे सत्यमिति श्रुतेः। तस्य ते भक्षीय तादृशं त्वां भक्षामि। अग्नेः भव्यं हे आज्य त्वं ज्या
लारूपाग्निजिह्वया इस्वादकत्वात् अग्नेर्जिह्वासि। देवानां सुखाय तपसे तिभिः हृदयत्वे देवेभ्यस्त्वदा तुतिस्था
नीयतनत्संचयपूर्वकग्रहणाय पत्रोसंभवः। शुक्रमसि। शुक्रं दीप्तिमत्। ज्योतिरसि। ज्योतिः प्रकाशकात्मकं ते
जः। तेजोसि। तेजोरूपमसि। भुक्त्वा० गच्छामि। स्पष्टं। देवानां० गच्छामि। हे आज्य त्वं प्राणादिवचाप्नोपंचा
यः शरीरस्थावाकारनिमित्तिनिवनायपञ्चो यमस्वस्थानाय च गच्छामि। देवानां चतं नो० गच्छामि। हे आज्यं त्वं मेनाधि
भिर्दोः समासेन पंच वर्त्तवः। शेषं व्याख्यातं। देवानां ता० दिशां यं०। देवानां ता यं च जनानां० देवानां सलिल

Indira Gandhi National
Centre for the Arts

नो। शेषं व्याख्यातं। अग्निरस्मि० गच्छामि। त्वं देवचक्षुरसि० गच्छामि। चक्षुरात्मनः पारस्यालोकमाचक्षते। स चक्षु
श्चितं पंचबिलेषु स्थितं। तच्च पुरुषस्य यावत्स्थाने कल्पमस्त्वाकारः उदानहारः। पंचबिलस्य चक्षुर्विज्ञायते आत्मन आ
२१ त्मेयं पर्वस्मिन्निविलेदर्शनं दृष्टेर्दक्षिणमं तं प्रतिष्ठितं नीत मित्रावरुणौ देवः पश्चिमं अमुमंत्रावरुण उत्तरं प
यसि यो ऽहं स्वसामर्थ्यं मे इति। तस्य पंचबिलस्य चक्षोर्यत्रायसादि पूर्ववत्। ब्रह्मणस्त्वा० गच्छामि। ब्रह्मणा त्रा
यमाणं जातं तेजो ब्रह्मवर्चसं। शेषं पूर्ववत्। क्षत्रस्य० गच्छामि। क्षत्रस्य क्षत्रियजातेरोजो मुद्गलमथ्यं शेषं व्या
ख्यातं। विशं त्वा० गच्छामि। वैश्यजातेः कृषिवाणिज्यादि मुख्यं त्रायस्यादि पूर्ववत्। सुवीर्याय० मि। सुवीर्यं सर्वेषां
स्वव्यापारे सामर्थ्यातिशयः। शेषं पूर्ववत्। चतुः पंचकृत्वो वा प्रतिमंत्रं शेषं लानुवाकशेषेण अन्यस्य सर्वेव
द्यार्थ्येयं। सुप्रजा० मि। हे आत्मन्त्वां शोभनापत्यतायै गच्छामि। रायस्पोषाय० मि। रायस्पोषाय धनपुष्टिः। ब्रह्म० मि २७
श्रुताध्ययनसंपत्तिर्ब्रह्मवर्चसं। अर्चिं० मि। स्पष्टं। अस्माकं० गच्छामि। हे आत्मन्त्वमस्माकं श्रेय सेभ वरे

तानां हविर्भव। यजमानस्य वा आशिषः। तद्रूपं भव। देवानां नर्यं केचोदेवतार्थं गच्छामि। कामाय त्वा गच्छामि।
हे आत्मन् हविर्भागिन्यो देवताभ्यो यथाकामं येन तथाविधः। अत्रा त्वा गच्छामि यजमान एतानात्मन्हृणमंत्रा
न्यजपति। मंत्रा सुन्यासाख्यानाः। कृत्स्नोत्याः० स्वाहा। हे इमे लेख्य त्रिपंचाद्भेदाच्चारणं कृत्स्नमगासि।
